# Shri Shankaracharya Ashtakam

# શ્રીશઙ્કરાચાર્યાષ્ટકમ્

## Document Information

Text title : Shankaracharya Ashtakam by Varadananda Bharati

File name : shankarAchAryAShTakamvaradAnandabhAratI.itx

Category : aShTaka, deities_misc, gurudev, shankarAchArya, varadAnanda

Location : doc_deities_misc

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Acknowledge-Permission: Amit S Nagare Sanskrit Amod, Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : April 22, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીશઙ્કરાચાર્યાષ્ટકમ્

વિશ્વસ્ય યઃ સકલમઙ્ગલધારણાય
    પૂર્ણાતટે વિધૃતવાન્ મનુજાવતારમ્ ।
તં પાદનમ્રજનતાપનગેન્દ્રવજ્રં
    શ્રીશઙ્કરં યતિવરં શિરસા નમામિ ॥ ૧॥

યસ્યાસ વિશ્વમિવ નન્દકુમારવક્ત્રે
    શાસ્ત્રાકરઃ કિમપિ બાલવિશાલબુદ્ધૌ ।
પ્રજ્ઞાપ્રભાસ્તિમિતપણ્ડિતમણ્ડલં તં
    શ્રીશઙ્કરં શિવગુરોસ્તનયં નમામિ ॥ ૨॥

સઞ્ચર્ય યેન પવનેન યથાઽર્યભૂમૌ
    વેદેષુ દુષ્ટરચિતાઽપહૃતા ચ ધૂલિઃ ।
તં તાર્કિકાદિમદમત્તગજેન્દ્રસિંહં
    શ્રીશઙ્કરં શિવકરં સતતં નમામિ ॥ ૩॥

ભાષ્યત્રયં મતિમલાપહરં વિરચ્ય
    કૈવલ્યમાર્ગ ઇવ યો નિદધૌ પ્રદીપાન્ ।
તં સર્વશાસ્ત્રનિગમાગમહૃદ્ગતજ્ઞં
    શ્રીશઙ્કરં ભયહરં સદયં નમામિ ॥ ૪॥

યેન સ્વકીયયશસા પરમોજ્જ્વલેન
    દિગ્વારણાઃ સમભિષિચ્ય કૃતાઃ સુશુભ્રાઃ ।
પાખણ્ડદુષ્ટમતખણ્ડનલબ્ધકીર્તિં
    શ્રીશઙ્કરં સકલલોકહિતં નમામિ ॥ ૫॥

અદ્વૈતતત્ત્વમમલં શ્રુતિસમ્મતં ચ
    યેનોપદિષ્ટમિહ જીવશિવૈક્યકારિ ।
સંસારદુસ્તરસમુદ્રમહાતરં તં
    શ્રીશઙ્કરં વિનતકલ્પતરું નમામિ ॥ ૬॥

કાશ્મીરદેશગતપીઠમનન્યભુક્તં
    શ્રીશારદાખ્યમધિરુહ્ય ચ યોદિદેશ ।
અદ્વૈતતત્ત્વમહતીં પુનરેકદા તં
    શ્રીશઙ્કરં નિરુપમેયકૃતિં નમામિ ॥ ૭॥

સંસ્થાપ્ય ધર્મમપહૃત્ય પરામવિદ્યાં
    સત્યં પ્રકાશ્ય જનતોપકૃતાસ્તિ યેન ।
ધ્યેયાર્થમેવ કૃતભૂરિચમત્કૃતિં તં
    શ્રીશઙ્કરં પ્રવરયોગિવરં નમામિ ॥ ૮॥

પાપોઽસ્મિ મન્દમતિરસ્મિ તથાનધીતઃ
    સત્યં પરં ત્વમસિ શઙ્કર દીનબન્ધુઃ ।
આલોકયાયિ શિવ વત્સલવીક્ષિતૈર્માં
    ઇત્યેવ દાસગણુશિષ્યલવસ્ય કામઃ ॥ ૯॥

ઇતિ સ્વામીવરદાનન્દભારતીકૃતં શ્રીશઙ્કરાચાર્યાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Shankaracharya Ashtakam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*